त्वात् नद्यां स्त्री। निरुक्ते च अजिरेति नद्या नाम्नि पठितम् ऋषिभेदे पु० तदपत्यम् शुभ्रा० ढक्। आजिरेयः तदपत्ये पु० स्त्री। उत्करा० छ। अजिरीयः तत्सम्बन्धिनि त्रि०।

**अजिरादि** ब० पाणिनिना संज्ञायां मतुपि दीर्घविधौ पर्य्युदस्ते शब्दसमूहे सच गणः अजिर, खदिर, पुलिन, हंस, कारण्डव, चक्रवाक इति। अजिरवती। तद्भिन्ने तु अमरावतीति।

**अजिह्म** त्रि० हा-मन् द्वित्वालोपौ ततः न० त०। सरले "अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकामिति" पुरा०।

**अजिह्मग** पु० अजिह्मं सरलं गच्छति गम-ड। वाणे। "वेगवद्भिरजिह्मगैरिति"। सरलगामिनि त्रि०। "अजेहिशमजिह्मग" इति।

**अजिह्व** पु० जि-वन् हुक् च जिह्वा रसना सा नास्ति यस्य ब०। भेके। तेषां जिह्वाशून्यत्वमुक्तं भारते आनु०। "उवाच देवान् मण्डूको रसातलतलोत्थितः। रसातलतले देवा! वसत्यग्निरिति प्रभो!। सन्तापादिह सम्प्राप्तः पावकप्रभवादहम्। स संसुप्तो जले देवा! भगवान् हव्यवाहनः। अपः सं सृज्य तेजोभिस्तेन सन्तापिता वयम्। तस्य दर्शनमिष्टं वो यदि देवा! विभावसोः। तत्रैनमधिगच्छध्वं कार्य्यं वो यदि वह्निना। गम्यतां साधयिष्यामो वयं ह्यग्निभयात् सुराः!। एतावदुक्त्वा मण्डूकस्त्वरितो जलमाविशत्। हुताशनस्तु बुबुधे मण्डूकस्य च पैशुनम्। शशाप स तमासाद्य न रसान् वेत्स्यसीति वै। तं वै संयुज्य शापेन मण्डूकं त्वरितो ययौ। अन्यत्र वासाय विभुर्न चात्मानमदर्शयत्। देवास्त्वनुग्रहञ्चक्रुर्मण्डूकानां भृगूत्तम!। यत्तच्छृणु महाबाहो! गदतो मम सर्वशः। अग्निशापादजिह्वापि रसज्ञानवहिष्कृताः। सरस्वतीं बहुविधां यूयमुच्चारयिष्यथ। विलवासगतांश्चैव निराहारानचेतसः। गतासूनपि संशुष्कान् भूमिः सन्धारयिष्यति। तमोघनायामपि वै निशायां विचरिष्यथ इति"। जिह्वाशून्ये त्रि०।

**अजीकव** अज्या शरक्षेपणेन कं ब्रह्माणं वाति प्रीणाति वा-क। शिवधनुषि। [आजीगर्त्तस्तदपत्ये पुंस्त्री।

**अजीगर्त्त** अज्यै गमनाय गर्त्तमस्य। सर्पे। वाह्वा० इञ्।

**अजीर्ण** न० जॄ-भावे क्त न०त०। जठरानलमान्द्येन भुक्तान्नादेरपाके, न०७ब०। रोगभेदे। "भवेदजीर्णं प्रति यस्य शङ्का स्निग्धस्य जन्तोर्बलिनोऽन्नकाले। पूर्व्वं सशुण्ठीमभयामशङ्कः संप्राश्य भुञ्जीत हितं हि पथ्यमिति" चक्र०। "अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदमिति" वैद्यकम्। कर्त्तरि क्त जीर्णोऽदृढः। तद्भिन्ने त्रि०।

**अजीव** त्रि० नास्ति जीवो जीवनं वा यस्य। जीवरहिते घटादौ, मृते, जन्तुमात्रे च।

**अजीवनि** स्त्री न+जीव-अनि। आक्रुश्यमाने जीवनाभावे निन्दितजीवने च "अजीवनिस्तव भूयात्" इति मुग्ध०। "तस्य भूयादजीवनिरिति"।

**अजुर** त्रि० अज-कुरच् व्यभावः। वेगशीले बलवति "अवक्रक्षिणं वृषभं यथाजुरमिति" वेदः।

**अजेय** त्रि० जेतुमशक्ये जि-यत् न०त०। जयायोग्ये। अजेयाख्ये घृते न०। "पिबेद्घृतमजेयाख्यमिति" वैद्यकम्।

**अजैकपाद (द्)** पु० अजस्य छागस्य एकः पाद इव पादो यस्य उपमा०ब० न पादस्यान्त्याकारलोपः। रुद्रविशेषे, तद्देवताके पूर्व्वभाद्रपदनक्षत्रे च। पाच्छब्देन समासे अजैकपादपि तत्रार्थे। "वीरभद्रश्च १ शम्भुश्च २ गिरीशश्च ३ महायशाः। "अजैकपाद (४) हिर्बुध्नः ५ पिनाकी ७ चापराजितः ७। भुवनाधीश्वरश्चैव ८ कपाली च ९ विशाम्पते! स्थाणु १० र्भगश्च ११ भगवान् रुद्रास्त्वेकादश स्मृता" इत्युक्तेषु एकादशसु रुद्रेषु मध्ये चतुर्थे रुद्रे। अन्यत्र तु अजैकपादहिर्बुध्न्या २ विरूपाक्षश्च ४ रैवतः ५। हरश्च ६ बहुरूपश्च ७! त्र्यम्बकश्च ८ सुरेश्वरः ९। रुद्रा एकादश प्रोक्ता जयन्त १० श्चापराजितः ११ इत्येवं तद्भेदाः। एतेषामेव ध्यानानि वक्ष्यन्ते। तेन अज इति नामान्तरं एकपादिति च नामान्तरमिति द्रष्टव्यम्। "तेन अजनामा महारुद्रम्" इत्यादि अजस्य ध्यानम्। "एकपादाभिधो विप्रेत्यादि" एकपादस्य ध्यानमिति वक्ष्यते

**अज्जूका** स्त्री अर्जयति या सा अर्ज्ज-ऊक, पृ० रकारस्य जत्वम्। वेश्यायाम्। नाट्य एवास्य प्रयोगः नान्यत्र।

**अज्झटा** स्त्री अजति दोषं क्षिपति अज्-क्विप् झटति संहन्यते झट-अच् ततः कर्म्म० पृ० कुत्ववीभावाभावः। (भुंइ आमला) इति प्रसिद्धे वृक्षे।

**अज्झल** न० अञ्चति क्विप् अक् हलति विलिखति हल-अच् कर्म्म० पृ० न कुत्वम्। चर्म्मादिमये प्रतियोधायुधप्रतिरोधके (ढाल) इति ख्याते फलके।

**अज्ञ** त्रि० न जानाति ज्ञा-क न०त०। ज्ञानशून्ये चैतन्यशून्ये, विशेषज्ञानशून्ये, मूर्खे, वेदान्तिमतसिद्धाज्ञानरूपपदार्थवति च। तैर्हि अहमज्ञ इत्यनुभवस्य अज्ञानविषयत्वं स्वीक्रियते अज्ञानञ्च न ज्ञानाभावः किन्तु पदार्थान्तरं